


लोकप्रियसाहित्यग्रन्थमाला-६४

आचार्य-धम्मानन्दकोसम्बि-प्रणीतः

# बोधिसत्त्वः

(मूलमराठीनाटकस्य संस्कृतानुवादः)

अनुवादकः सम्पादकश्च
**डॉ. प्रफुल्लगडपालः**

राष्ट्रियसंस्कृतसंस्थानम्
(भारतशासन-मानवसंसाधनविकासमन्त्रालयाधीनः,
राष्ट्रियमूल्याङ्कन-प्रत्यायनपरिषदा 'ए'-श्रेण्या प्रत्यायितः मानितविश्वविद्यालयः)
नवदेहली

लोकप्रियसाहित्यग्रन्थमाला–68

आचार्य-धम्मानन्दकोसम्बि-प्रणीतः

# बोधिसत्त्वः

(नाटकम्)

अनुवादकः सम्पादकश्च
डा. प्रफुल्लगडपालः

राष्ट्रियसंस्कृतसंस्थानम्
(भारतशासन-मानवसंसाधनविकासमन्त्रालयाधीनः
राष्ट्रियमूल्याङ्कन-प्रत्यायनपरिषदा 'ए'-श्रेण्या प्रत्यायितः मानितविश्वविद्यालयः)
नवदेहली

# प्रस्तावना

बोधिः नाम सम्पूर्णं ज्ञानम्, एतस्य ज्ञानस्य प्राप्त्यै अविश्रान्ततया प्रयत्नशीलः सत्त्वः (प्राणी) 'बोधिसत्त्वः' कथ्यते। अतिप्राचीनकाले विशेषणमिदं गौतमबुद्धस्य कृते तस्य जन्मतः आरभ्य पूर्णज्ञानप्राप्तिं यावत् प्रयुज्यते स्म, इदं नालकसुत्तस्य प्रस्तावनायाः अध्ययनेन ज्ञायते (भगवान् बुद्ध 1-85)। तस्य बोधिसत्त्वस्य जीवनचरितस्य रूपरेखा त्रिपिटकग्रन्थाधारेण प्रकटनोद्देश्येन मयेदं नाटकं प्रणीतम्।[1]

## प्रथमः अङ्कः

बोधिसत्त्वस्य जन्मानन्तरम् असितर्षिः तस्य भविष्यवर्णनमकरोत्, कथेयम् अत्यन्तं पुरातनी वर्तते (भगवान् बुद्ध 1-96)। तस्यैव आधारेण अस्य अङ्कस्य आद्यौ द्वौ प्रवेशकौ लिखितौ। बोधिसत्त्वजन्मानन्तरं सप्तमे दिने मायादेवी मृता इत्ययम् उल्लेखः त्रिपिटकेषु क्वचित् क्वचिल्लभ्यते। तेनाधारेण तृतीयः प्रवेशकः लिखितः। चतुर्थ-पञ्चमयोः प्रवेशकयोः कृते त्रिपिटकेषु आधारो नास्ति। बोधिसत्त्वो गौतमः बाल्यकालादेव स्वतन्त्रः विचारकः अवश्यं स्यात्, तस्मै मृगयाकर्म अपि न रोचितम् अभविष्यत्

---

1. प्रस्तावनायामस्यां मुख्यरूपेण येषां त्रयाणां ग्रन्थानाम् उल्लेखो जातः, ते अधोलिखिताः वर्तन्ते -
   - अ. 'भगवान् बुद्ध', प्रकाशक-सुविचार प्रकाशन मण्डल, नागपुर पूणे च। अस्य ग्रन्थस्य हिन्द्यनुवादः साहित्याकादमीतो जातः।
   - ब. 'बौद्ध संघाचा परिचय', प्रकाशक-कर्णाटक प्रेस, ठाकुर द्वार, मुम्बई। अस्य गुजरातीभाषया अनुवादः 'बौद्धसंघ नो परिचय' इति नाम्ना गुजरात-पुरातत्त्व-मन्दिर, अहमदाबादतः प्रकाशितोऽभवत्।
   - स. 'ललितविस्तर' - Halle A.S., Verlag Der Buchhandlung, Des Waisenhauses (1902).

# विषयानुक्रमणिका


| | |
|---|---|
| समर्पणम् | *iii* |
| पुरोवाक् - प्रो. राधावल्लभत्रिपाठी | *v* |
| आमुखम् (सयुक्तिकी उपपत्तिः) - काकासाहेब-कालेलकरः | *vii* |
| प्रस्तावना - आचार्यः धम्मानन्दकोसम्बी | *xiii* |
| नाटककारपरिचयः | *xxi* |
| भूमिका - डा. प्रफुल्लगडपालः | *xxix* |
| पात्रपरिचयः | *liii* |
| प्रथमः अङ्कः | 1-21 |
| द्वितीयः अङ्कः | 22-46 |
| तृतीयः अङ्कः | 47-77 |
| चतुर्थः अङ्कः | 78-113 |
| परिशिष्टम् | 114 |
| 1. आधुनिककाले विरचितं बुद्धचरिताश्रितं संस्कृतसाहित्यम् | |


अनुभवति यत् 'कौशलराजस्य अनुमतिं विना भवते मृत्युदण्डः देशत्यागदण्डो वा शाक्यसंघेन दातुं न शक्यते। संघः साधिकारम् इदं न कर्तुं शक्नोति। बलात् यदि दण्डः दीयते चेत् कौशलराजेन शाक्यसंघस्य स्वतन्त्रता समापयिष्यते इत्यादि....।' किन्तु ध्यातव्यः भवत्परिवारस्य बहिष्कारः अस्माभिः कर्तुं शक्यते आहोस्वित् संघेन भवतः परिवारस्य भूमिरपि बलात् स्वीकर्तुं शक्या। एतदर्थं कौशलराजस्य आज्ञा नैव अपेक्षिता भविष्यति।

वयं भवतः परिवारस्य बहिष्कारं कुर्मः अथवा भूमिम् अपहरिष्यामः तर्हि भवान् कौशलराजस्य समीपे स्वीयं निवेदनं स्वीकृत्य गमिष्यति एव खलु?

बोधिसत्त्वः - संघः मृत्युदण्डेन अथवा देशत्यागदण्डेन मां दण्डयेन्नाम, तद्विरुद्धं कौशलराजाय न्यायं याचयितुं नाहं गमिष्यामि, एतस्मिन् विषये भवन्तः चिन्तारहिताः सन्तु। परन्तु मम परिवारस्य बहिष्कारम् अथवा भूमिं स्वीकृत्य मम परिजनान् सर्वान् नैव अनाथीकुर्वन्तु, इयमेव मे संघस्य पुरतः विनम्रा प्रार्थना। अस्मिन् प्रसङ्गे अहम् एकाकी एव दण्डभाक्, अतः अहमेव दण्ड्यः, न तु मम परिवारः, अन्ये वा।

शाक्यसेनापतिः- अस्माभिः भवान् मृत्युदण्डेन देशत्यागदण्डेन वा दण्ड्यते, तर्हि अस्य सूचना कौशलराजः अवश्यं प्राप्स्यति। तस्य आज्ञां विना एतयोः एकोऽपि दण्डः भवते दीयते चेत् वर्तमाने कथञ्चित् रक्षिताम् अस्माकं राज्यस्य स्वतन्त्रताम् अपि नाशयितुं सः अवसरं प्राप्स्यति। निश्चयेन सः तां स्वतन्त्रतां समापयिष्यति। सत्यं खलु इदम्?

बोधिसत्त्वः - यदि भवन्तः एवं चिन्तयन्ति तर्हि अहं कञ्चन मार्गं निर्दिशामि। अहं युद्धे भागं तु नैव ग्रहीष्यामि, तत्तु निश्चितं



आचार्यो धम्मानन्द-कोसम्बी

जन्म - 09 अक्टूबर, 1876 परिनिर्वाण - 05 जून, 1947


राष्ट्रियसंस्कृतसंस्थानम्

( भारतशासन-मानवसंसाधनविकासमन्त्रालयाधीनः,
राष्ट्रियमूल्याङ्कन-प्रत्यायनपरिषदा 'ए'-श्रेण्या प्रत्यायितः मानितविश्वविद्यालयः )

56-57, इन्स्टीट्यूशनल एरिया, जनकपुरी, नवदेहली-110058

दूरभाष : 011-28524993, 28521994, 28520977

email : rsks@nda.vsnl.net.in
website : www.sanskrit.nic.in